पाद्मे वैशाखमाहात्म्ये श्रीनारदाम्बरीषसंवादे।
यथा,—
"जीवितं यस्य धर्म्मार्थं धर्म्मो हर्य्यर्थमेव च।
अहोरात्राणि पुण्यार्थं तं मन्ये वैष्णवं जनम्॥"
लैङ्गे च।
"विष्णुभक्तिसमायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान्।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्त्तितः॥"
गुणवत्सु भक्तिहेतुकृपालुत्वादिसद्गुणशीलता तत्रैव।
"परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम!।
भगवद्धर्म्मनिरतास्ते नरा वैष्णवा नृप!॥"
भागवततृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादे।
यथा,—
"तितिक्षवः कारुणिकाः सुहृदः सर्व्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥"
पञ्चमस्कन्धे ऋषभदेवस्य पुत्रानुशासने। यथा,

"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये॥"

एकादशस्कन्धे श्रीभगवत्प्रदत्तोद्धवप्रश्नोत्तरे।
यथा,—
"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्यो मैत्रः कारुणिकः कविः॥"
विष्णुपुराणे यमतद्भटसंवादे। यथा,—

"न चलति निजवर्णधर्म्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः
स्थिरमनसं तमवेहि विष्णुभक्तम्॥"*॥

ज्ञानिषु भक्तिहेतुज्ञानवत्ता एकादशे। यथा,—
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥
ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः॥
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥
अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"
भोगवत्सु भक्तिहेतुभोगानासक्तता हरियोगेश्वरोत्तरे। यथा,—
"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"
वर्ज्जमतियादिमत्सु भक्तिहेतुनिरभिमानिता

तत्रैव। यथा,—
"न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥
भावाः कथञ्चिद्भक्त्यैव ज्ञानाज्ञानाद्यसमानिता।
भक्तिनिष्ठापका जातास्ततो ह्युत्तमतोदिता॥"
निष्ठापकाः परिपाकं प्रापकाः॥*॥
शैवेषु श्रीशिवविष्ण्वभेदकता बृहन्नारदीये।
"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"
इति॥*॥
"अन्यत्र तेषां भगवच्छास्त्रार्थपरतादिकम्।
साक्षाद्भक्त्यात्मकं मुख्यं लक्षणं लिख्यतेऽधुना॥"
श्रीभागवतशास्त्रपरता स्कान्दे।
"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"
वैष्णवसम्माननिष्ठा लैङ्गे।
"विष्णुभक्तमथायातं यो दृष्ट्वा सुमुखप्रियः।
प्रणामादि करोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम्॥
रूक्षाक्षरा गिरः शृण्वन् तथा भागवतेरिताः।
प्रणामपूर्व्वं क्षमते यो वदेद्वैष्णवो हि सः॥
भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥
गारुडे।
"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः॥*॥
श्रीतुलसीसेवानिष्ठा बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृद्धृतं येन ते वै भागवतोत्तमाः॥"*॥
श्रीभगवतः कथापरता बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"
स्कान्दे श्रीभगवदर्ज्जुनसंवादे।
"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति यः।
हृष्यते मत्कथायाञ्च स वै भागवतोत्तमः॥"
तृतीयस्कन्धे तत्रैव।
"मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः॥"*॥
नामपरता बृहन्नारदीये तत्रैव।
मच्चाङ्गनाश्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥"
तत्रैवान्यत्र।
"अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्मरणपरता। तत्र स्वधर्म्मनिष्ठया रागद्वेषादिनिवृत्त्या स्मरणं श्रीविष्णुपुराणे यमतद्भटसंवादे।

"न चलति उच्चैः श्रीभगवत्पदारविन्दे सितमनास्तमवेहि विष्णुभक्तम्।
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतस्तमेनम्।
मनसि कृतजनार्द्दनं मनुष्यं
सततमवेहि हरेरतीव भक्तम्॥
कनकमपि रहस्यवेक्ष्य बुद्ध्या
तृणमिव यः समवैति वै परस्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम्॥
स्फटिकगिरिशिलामलः क विष्णु-
र्मनसि नृणां क च मत्सरादिदोषः।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताशनदीप्तिजः प्रतापः॥
विमलमतिरमत्सरः प्रशान्तः शुचि-
चरितोऽखिलसत्त्वमित्रभूतः।
प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपोतः॥

अन्यविजयेन वैराग्यादिना च स्मरणं श्रीहरियोगेश्वरोत्तरे।

देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्म्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥
त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः॥"

पूजापरता स्कान्दे तत्रैव।
"येऽर्च्चयन्ति सदा विष्णुं जगदीशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"
लैङ्गे।
"विष्णुचिह्नैः शुभान्येव करोति लोहसंयुतः।
प्रतिमाश्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"
वैष्णवधर्म्मनिष्ठतादि पाद्मोत्तरखण्डे।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः॥"
तापः तप्तमुद्राधारणं तदादिपञ्चसंस्कारयुक्तः।
पञ्चसंस्काराश्च तत्रैवोक्ताः। [इति॥
"तापः पुण्ड्रस्तथा नाम मन्त्रो यागस्तु पञ्चमः॥"